Register Number:

Date:

**ST. JOSEPH'S COLLEGE (AUTONOMOUS), BANGALORE-27**

**B.A. B.SC. SANSKRIT - III SEMESTER**

**SEMESTER EXAMINATION: October 2019**

**318 -SANSKRIT**

**Time- 2 1/2 hrs** **Max Marks-70**

**I. दशानाम् एकवाक्येन संस्कृतभाषया उत्तरं लिखत।** 10×1=10

अ) कः न जायते न म्रियते?

आ) सर्पाणां कः अस्ति?

इ) तामसाः कुत्र गच्छन्ति?

ई) प्रकृतिं यान्ति मामिकां इत्यत्र 'मामिकाम्' इत्यस्य पदस्य अर्थः कः?

उ) कस्मात् भूतानि जायन्ते?

ऊ) 'क्षेत्रम्' इति पदेन किम् अभिधीयते ?

ऋ) स्वधर्मे कः श्रेयः?

ॠ) विभूतियोगः कतमः अध्यायः?

ऌ) कदा चान्द्रमसं ज्योतिः भवति?

ए) भगवद्गीतायाः नामान्तरं लिखत?

ऐ) कीदृशः भक्तिमान् मम प्रियः?

ओ) मार्गत्रयाणां नामानि लिखत?

**II. रिक्तस्थानं पूरयत।** 5×1=5

2. ____________ राजसः परिकीर्तितः।

क. अभयं सत्वसंशुद्धिः ____________ ।

ख. प्राणापानसमायुक्तः ___________ ।

ग. ______________ कर्ता तामस उच्यते ।

घ. न जायते म्रियते वा कदाचित् _____________ ।

ङ. सङ्गात् सञ्जायते कामः ___________ ।

III. **श्लोकयोः अन्वय-तात्पर्य-व्याकरणांशान् लिखत।** 2×5=10

3. मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।

 यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥

4. पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।

 तदहं भक्त्युपहृतं अह्नामि प्रयतात्मनः॥

5. उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।

 आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥

IV. **पञ्चानां सन्दर्भं विवृणुत।** 5×3=15

6. यद्गत्वा न निवर्तन्ते तद्धाम परमं मम।

7. स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि।

8. अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।

9. यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।

10. ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।

11. युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।

V. **श्लोकसहितं प्रबन्धं लिखत।** 2×10=20

12. विभूतियोगं वर्णयत।

13. सत्व-रज-तमोगुणानां विषयमधिकृत्य यथामतिं लिखत।

14. विश्वरूपदर्शनं विवृणुत?

VI. **अनुच्छेदं पठित्वा उत्तरत।** 5×2=10

कदाचित् बुद्धः स्वशिष्यान् सर्वान् आहूय अवदत् – “अयि भिक्षवः इतः चतुर्थे मासे मम परिनिर्वाणं भविष्यति। अतः तदभ्यन्तरे यद्यत् करणीयं स्यात् तत् कुर्वन्तु अविलम्बेन” इति। बुद्धस्य एतां परिनिर्वाणवार्तां श्रुत्वा सर्वे शिष्याः महाविषादे निमग्नाः। केचन रोदनं कुर्वन्, पुनः केचन अन्नपानादिकं पर्यत्यजन्। अन्ये केचन दिग्भ्रान्त्या इतिकर्तव्यताविमूढाः जाताः। तिष्यः बुद्धस्य प्रमुखेषु शिष्येषु अन्यतमः। सः तु बुद्धस्य परिनिर्वाणवार्तां श्रुत्वा नितरां मौनी अभवत्। तस्य एतां स्थितिं दृष्ट्वा अन्ये अचिन्तयन्। अयं महाघातं प्राप्य एवं व्यवहरति, यदि एषा एव स्थितिः ननिवर्तेत तर्हि एतस्य उन्मत्तता भवेत् इति। अतः ते बुद्धस्य समीपं गत्वा – “तिष्यः दुःखम् आत्मनि एव निगृह्णन् मौनी जातः अस्ति। सः मतिवैकल्यात् भवता रक्षणीयः सः” इति प्रार्थितवन्तः। तत् श्रुत्वा बुद्धः तिष्यम् आहूय विवरणं दातु अवदत् – तदा तिष्यः विवृतवान् – “अहं भवतः अनुग्रहं काङ्क्षन् सर्वदा ध्याने मग्नः भवामि। ध्यानावस्थायां मौनावलम्बनं सहजम्

इति।”

एतत् श्रुत्वा मन्दहासं प्रकटयन् तिष्यम् आशीर्वादेन अनुगृह्य बुद्धः अन्यान् शिष्यान् अवदत् – “रोदनविलपनादिभिः न किमपि प्रयोजनम्। यः ध्यानादिभिः आत्मोन्नतिं साधयितुं प्रयासं कुर्यात् सः एव विकासं प्राप्नुयात्। त्वरा तु करणीया – आत्मोन्नतिप्राप्तिनिमित्तम्। अयमेव मम कथनस्य आशयः आसीत्” इति।

15. **प्रश्नाः -**

च. बुद्धस्य परिनिर्वाणवार्तां श्रुत्वा शिष्याः कीदृशाः अभवन्?

छ. तिष्यस्य उन्मत्तता भवेत् इति किमर्थं चिन्तितवन्तः शिष्याः?

ज. तिष्यः किं विवृतवान्?

झ. बुद्धः तिष्यम् अनुगृह्य सर्वान् शिष्यान् उद्दिश्य किम् अवदत्?

ञ. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।